# श्री शौरिराज करावलम्बम्

श्रीनीलमेघ सुमनोहर दिव्यमूर्ते
सर्वाङ्गसुन्दरविभो वरपुष्कराक्ष ।
लोकैकनायक परात्पर पुण्यकीर्ते
श्री शौरिराज मम देहि करावलम्बम् ।।

लक्ष्मीश देव यदुनाथ महीश विष्णो
गोदासमेत गरूडासन शेषतल्प ।
वेदान्तवेद्य निजवैभव विश्वमूर्ते
श्री शौरिराज मम देहि करावलम्बम् ।।

श्रीपद्मिनीप्रणयवल्लभ पङ्कजाक्ष
श्रीपञ्चकृष्णवननायक पञ्चवेर ।
श्रीमन्त्ररत्नसकलाक्षरसिद्धिदायिन्
श्री शौरिराज मम देहि करावलम्बम् ।।

श्रीनारदादिमुनिपुङ्गवपूजिताङ्घ्रे
नारायणाच्युत हरे प्रणतार्तिहारिन् ।
ब्रह्मेशशक्रमुख संस्तुत सद्गुणौघ
श्री शौरिराज मम देहि करावलम्बम् ।।

कासारभूत महदाह्वय विष्णुचित्त -
श्री भक्तिसार कुलशेखर पाणविप्रैः ।
श्रीमच्छठारि परकालमुखैश्च वन्द्य
श्री शौरिराज मम देहि करावलम्बम् ।।

श्रीनाथयोगि कमलेक्षण राममिश्र -
श्रीयामुनेय वरपूर्णनुतप्रभाव ।
श्री लक्ष्मणार्य यतिवर्य मुखैस्तुतस्त्वं
श्री शौरिराज मम देहि करावलम्बम् ।। ६

श्रीमीन कूर्म वरकोल नृसिंहवर्णिन्
श्रीजामदग्न्य रघुवीर हलाढ्य कृष्ण ।
श्रीकल्किरूप कलिमर्दन कालमेघ
श्री शौरिराज मम देहि करावलम्बम् ।। ७

वैशाखमास महदुत्सव तुष्टचित्त
माघोत्सवे वरसमुद्रतटे विहारिन् ।
आन्दोलिकादि सुखयान गति प्रहृष्ट
श्री शौरिराज मम देहि करावलम्बम् ।। ८

भक्तं मुनैयधरमात्मगुणैः प्रपूर्णं
संशोद्ध्य तत्सहचरीकृत मुद्गशालिम् ।
स्वीकृत्य चार्धनिशि नित्यपदं ददौ त्वं
श्री शौरिराज मम देहि करावलम्बम् ।। ९

श्रीशङ्खचक्रवरदानगदात्तपाणे
सद्भक्तभद्रपरिपालनजागरूक ।
श्रीचोलराजपुरतो धृतकेशपाश
श्री शौरिराज मम देहि करावलम्बम् ।। १०

दर्शे विभीषणवचः कृतवान् भवान्
श्रीरङ्गराजगतिभेदमधास्तदर्थम् ।
भक्तप्रिय भवलुण्ठन कोविदस्त्वं
श्री शौरिराज मम देहि करावलम्बम् ।। ११

अर्केन्दु भौम बुधजीव कवीश सौरि -
भास्वत्किरीट मणिराजित पादपद्म ।
अष्टाक्षरैक मनुरत्न कृतात्मरूप
श्री शौरिराज मम देहि करावलम्बम् ।। १२

प्रत्यग्रपापप्रचुरार्दित जीवनस्य
अज्ञानिनश्च ममतामदविह्वलस्य ।
कल्याणरूप कमनीय गुणार्णवस्त्वं
श्री शौरिराज मम देहि करावलम्बम् ।। १३

नित्यापराधचकितस्य नितान्तदुःख -
कृत्यापचारशतदष्टहृदन्तरस्य ।
धर्मादपेत चरितस्य भयाकुलस्य
श्री शौरिराज मम देहि करावलम्बम् ।। १४

संसार जालपतितस्य झषोपमस्य
सद्भक्त धीवरसुता सहितस्त्वमद्य ।
दुष्कर्मघर्मजनिभीत्यभिपीडितस्य
श्री शौरिराज मम देहि करावलम्बम् ।। १५

पाशैस्सदा यमभटा बहु तर्जयन्ति
क्षेप्तुं च मां हि नरके नरकान्तकस्त्वम् ।
प्राणप्रयाण समये च तदा प्रसन्नः
श्री शौरिराज मम देहि करावलम्बम् ।। १६